Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 20

No. of Printed Pages – 11

**SS–12–Sanskrit Sah.**

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

# उच्च माध्यमिक परीक्षा, 2024

## SENIOR SECONDARY EXAMINATION, 2024

## संस्कृतसाहित्यम्

**समय : 3:15 (सपाद त्रिवादनम्)**

**पूर्णाङ्क : 80**

Previous Pathshala

**परीक्षार्थिभ्यः सामान्य निर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांकः अनिवार्यतः लेख्यः ।

2) सर्वे प्रश्नाः अनिवार्याः ।

3) प्रत्येकं प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम् ।

4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

## खण्डः – 'अ'

**1)** वस्तुनिष्ठ प्रश्नाः –

i) 'अनेजत्' इति पदं कस्य कृते प्रयुक्तम्? **[1]**

अ) आत्मनः कृते

ब) शरीरस्य कृते

स) संसारस्य कृते

द) विद्यायाः कृते

ii) गुरूदक्षिणार्थी कः आसीत्? **[1]**

अ) वरतन्तुः

ब) कौत्सः

स) रघुः

द) रामः

iii) 'कर्मगौरवम्' इति पाठः कुतः संकलितः? **[1]**

अ) रामायणतः

ब) ऋग्वेदतः

स) महाभाष्यतः

द) श्रीमद्भगवद्गीतातः

iv) मनसि वचसि काये पुण्यपीयूषपूर्णाः के भवन्ति? **[1]**

अ) मनुष्याः

ब) पशवः

स) सन्तः

द) असन्तः

v) योगाङ्गानि कति भवन्ति? [1]

अ) अष्टौ

ब) चत्वारि

स) षट्

द) पञ्च

vi) 'पावका' इति पदे कः गणः? [1]

अ) यगणः

ब) रगणः

स) मगणः

द) जगणः

vii) उपमानोपमेययोः अभेदः कुत्र भवति? [1]

अ) अनुप्रासे

ब) यमके

स) उपमायाम्

द) रूपके

viii) 'आ+दा+ल्यप्' इत्यत्र किं पदं भवति? [1]

अ) आदातुम्

ब) आदाय्यम्

स) आदाय

द) आदाया

ix) 'वाग्भूषणम्' इत्यत्र कः सन्धिः? किं च सूत्रम्? [1]

अ) चर्त्वम् (खरि च)

ब) जश्त्वम् (झलां जशोऽन्ते)

स) श्चुत्वम् (स्तोः श्चुना श्चुः)

द) अनुनासिकः (यरोऽनुनासिकेऽनुनासिको वा)

**2)** **रिक्तस्थानानि पूरयत –**

**उचित – उपपदविभक्तिं लिखत –**

i) ................ प्रति क: क्षत्रिय:। (महाराज) **[1]**

ii) ............... तुल्यम् औदार्यम् अस्ति। (विक्रम) **[1]**

iii) सीता ................ सह वनम् अगच्छत्। (राम) **[1]**

iv) ................ परित: गोपालका: सन्ति। (कृष्ण) **[1]**

**प्रकृति प्रत्ययौ योजयित्वा लिखत –**

v) राजा सिहासने ............... गच्छति। (सम्+उप+विश्+तुमुन्) **[1]**

vi) स: वारिवाहानाम् अभ्यन्तरं ............ । (प्र+विश्+क्त) **[1]**

vii) ............... शिवालयं गच्छति। (गौर+ङीष्) **[1]**

**3)** क) **अतिलघूत्तरात्मक प्रश्ना: –**

i) 'कुर्वन्नेवेह कर्माणि' इति मन्त्रांश: कस्या: उपनिषद: ? **[1]**

ii) उपमा–अलङ्कारस्य प्रयोगे क: कवि: प्रसिद्ध:? **[1]**

iii) 'उत्तररामचरितम्' इति नाटकस्य कथावस्तु कुत: गृहीतम्? **[1]**

iv) कादम्बरी केन लिखिता? **[1]**

v) महाकवे: भर्तृहरे: कति शतकानि? **[1]**

vi) 'शिवराजविजय:' इति कीदृश: उपन्यास: अस्ति? **[1]**

vii) यात्राविलास–महाकाव्यं केन रचितम्? **[1]**

viii) मानवंशमहाकाव्यं केन लिखितम्? **[1]**

ix) 'वैदिककोष:' इति ग्रन्थं क: रचितवान्? **[1]**

x) 'आदर्शरमणी' इति उपन्यास: केन रचित:? **[1]**

ख) अधोलिखितपदानां सूत्रोल्लेखपूर्वकं सन्धिविच्छेदं कुरूत। **[1+1+1=3]**

i) दैत्यारि:

ii) कर्मणैव

iii) जनयेदज्ञानाम्

## खण्डः – 'ब'

4) अधोलिखितयोः छन्दसोः एकस्य लक्षणम् उदाहरणं च लिखत – [2]

क) इन्द्रवज्रा

ख) वंशस्थवृत्तम्

5) अधोलिखित – श्लोकांशस्य गणचिह्नं प्रदर्शयन् छन्दसः नामोल्लेखं कुरूत – [2]

''त्वमेव माता च पिता त्वमेव''।

6) अधोलिखितयोः अलंकारयोः कस्यचिद् एकस्य लक्षणम् उदाहरणं च लिखत – [2]

क) यमकम्

ख) अतिशयोक्तिः

7) अधोलिखित–श्लोकस्य अलंकारस्य लक्षणं लिखत – [2]

''तावत् कोकिल विरसान् यापय दिवसान् वनान्तरे निवसन्।

यावन्मिलदलिमालः कोऽपि रसालः समुल्लसति।।''

8) अधोलिखित श्लोकस्य अन्वयं लिखत – [2]

विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः।

यशसि चाभिरूचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम्।।

9) अधोलिखित शब्दानाम् अर्थं लिखत – [2]

क) जवीयः ख) कोषजातम्

ग) असक्तः घ) मूर्धजाः

**10)** हिन्दीभाषायां सप्रसङ्गभावार्थं लिखत । **[2]**

''कर्मण्येवाधिकारस्ते मा फलेषु कदाचन''।

अधोलिखितम् अपठित गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।

को न जानाति अद्य स्वामिविवेकानन्दम्। अस्य महापुरूषस्य जन्म 1863 तमे ख्रिस्ताब्दे जनवरीमासस्य द्वादशदिनाङ्के मकरसङ्क्रान्तिपर्वण: अवसरे गंगातटे कोलकाता नगरे एकस्मिन् सम्पन्ने परिवारे अभवत्। तस्य माता भुवनेश्वरी देवी पिता च विश्वनाथदत्त: आसीत्। तस्य पिता वाक्कील: आसीत्। आध्यात्मिकता तु अस्य बालकस्य रक्ते एव आसीत्। तस्य पितामह: दुर्गाचरण: आसीत्। धर्मपरायणी माता बालकं शिवस्य प्रसादं मत्वा तस्य नाम 'वीरेश्वर:' इति कृतवती किन्तु परिवारे व्यवहारे च बालकोऽयं नरेन्द्रनाथ दत्त: एव आसीत्। स: चंचल: आसीत्।

**11)** एकपदेन उत्तरत – **[4×½=2]**

क) स्वामिविवेकानन्दस्य पिता क: आसीत्?

ख) विवेकानन्दस्य रक्ते का आसीत्?

ग) माता बालकं कस्य प्रसादं मत्वा तस्य नाम 'वीरेश्वर:' इति कृतवती?

घ) परिवारे व्यवहारे च अस्य किं नाम आसीत्?

**12)** पूर्णवाक्येन उत्तरत – **[1+1+1=3]**

क) विवेकानन्दस्य जन्म कदा अभवत्?

ख) स्वामिविवेकानन्दस्य मातुर्नाम किम् आसीत्?

ग) दुर्गाचरण: क: आसीत्?

**13)** भाषा – सम्बद्धकार्यम् – **[4×½=2]**

क) 'पिता वाक्कील: आसीत्'? इत्यत्र कर्तृपदं लिखत।

ख) 'धर्मपरायणी माता बालकं शिवस्य प्रसादं मनुते' इत्यत्र विशेषणपदं लिखत।

ग) 'तस्य' इति सर्वनामपदस्य सञ्ज्ञापदं लिखत ।

घ) 'स्थिर:' इत्यस्य विलोमपदं लिखत ।

**14)** अस्य गद्यांशस्य समुचितं शीर्षकं लिखत । **[1]**

**खण्डः – 'स'**

**15)** अधोलिखितं पठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत। **[5]**

**मासोऽयमाषाढः, अस्ति च सायं समयः, अस्तं जिगमिषुर्भगवान् भास्करः, सिन्दूर द्रवस्नातानामिव वरूणदिग व लम्बिना मरूण वारिवाहानामभ्यन्तरं प्रविष्टः। कलविङ्काश्चाटकैररूतैः परिपूर्णेषु नीडेषु प्रतिनिवर्तन्ते। वनानि प्रतिक्षणमधिकाधिकां श्यामतां कलयन्ति।**

i) यथानिर्देशम् उत्तरं लिखत – **[1+1+1=3]**

क) कः अस्तं जिगमिषुः? (एकपदेन उत्तरत)

ख) नीडेषु के प्रतिनिवर्तन्ते? (एकपदेन उत्तरत)

ग) कानि श्यामतां कलयन्ति? (पूर्णवाक्येन उत्तरत)

ii) भाषिककार्यम् – (प्रदत्तविकल्पेभ्यः उत्तरं चिनुत) **[1+1=2]**

क) 'अस्ति च सायं समयः' इत्यत्र क्रियापदं किम्?

अ) च ब) अस्ति

स) सायं द) समयः

ख) 'अस्तं जिगमिषुर्भगवान् भास्करः' इत्यत्र विशेष्यं किम्?

अ) अस्तं ब) जिगमिषुः

स) भगवान् द) भास्करः

अथवा

**तस्मै राज्ञे व्ययार्थं रत्नचतुष्टयं दास्यामि। एतेषां माहात्म्यम् एकं रत्नं यद्वस्तु स्मर्यते तद्ददाति। द्वितीय रत्नेन भोजना दिकममृततुल्यमुत्पद्यते। तृतीय रत्नाच्चतुरङ्गबलं भवति। चतुर्थाद्रत्नाद्दिव्याभरणानि जायन्ते। तदेतानि रत्नानि गृहीत्वा राज्ञो हस्ते प्रयच्छेति।**

i) यथानिर्देशम् उत्तरं लिखत – **[1+1+1=3]**

क) राज्ञे किमर्थं रत्नचतुष्टयं दास्यामि? (एकपदेन उत्तरत)

ख) भोजनादिकममृततुल्यं केन उत्पद्यते? (एकपदेन उत्तरत)

ग) तृतीयरत्नात् किं भवति? (पूर्ण वाक्येन उत्तरत)

ii) भाषिककार्यम् – (प्रदत्तविकल्पेभ्य: उत्तरं चिनुत) [1+1=2]

क) 'चतुर्थाद्रत्नाद्दिव्याभरणानि जायन्ते' इत्यत्र कर्तृपदं किम्?

अ) चतुर्थात्  ब) दिव्याभरणानि

स) रत्नात्  द) जायन्ते

ख) एतानि रत्नानि गृहीत्वा राज्ञो हस्ते प्रयच्छेति वाक्ये विशेष्यं किम्?

अ) रत्नानि  ब) एतानि

स) राज्ञो हस्ते  द) प्रयच्छ

**16)** अधोलिखितं पद्यं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत। [5]

सर्वत्र नो वार्तमवेहि राजन्,
  नाथे कुतस्त्वय्यशुभं प्रजानाम्।
सूर्ये तपत्यावरणाय दृष्टे:,
  कल्पेत लोकस्य कथं तमिस्रा ॥

i) यथानिर्देशम् उत्तरं लिखत – [1+1+1=3]

क) न: किम् अवेहि? (एकपदेन उत्तरत)

ख) त्वयि नाथे केषाम् अशुभं न भवति? (एकपदेन उत्तरत)

ग) सूर्ये तपति लोकस्य दृष्टे: आवरणाय का न कल्पेत? (पूर्ण वाक्येन उत्तरत)

ii) भाषिककार्यम् (प्रदत्तविकल्पेभ्य: उत्तरं चिनुत) [1+1=2]

क) 'सर्वत्र नो वार्तमवेहि राजन्' इत्यत्र क्रियापदं किम्?

अ) नो  ब) वार्तम्

स) अवेहि  द) राजन्

ख) 'कुशलताम्' इति पदस्य पर्यायपदं किम्?

अ) अशुभम्  ब) वार्तम्

स) कल्पेत  द) तमिस्रा

अथवा

स्वायत्तमेकान्तगुणं विधात्रा विनिर्मितं छादनमज्ञताया:।

विशेषत: सर्वविदां समाजे विभूषणं मौनमपण्डितानाम्।।

i) यथानिर्देशम् उत्तरं लिखत – [1+1+1=3]

क) स्वायत्तमेकान्तगुणं केन विनिर्मितम्? (एकपदेन उत्तरत)

ख) मौनं केषां समाजे अपण्डितानां विभूषणं भवति? (एकपदेन उत्तरत)

ग) अज्ञताया: छादनम् एकान्तगुणं किम्? (पूर्णवाक्येन उत्तरं चिनुत)

ii) भाषिककार्यम् (प्रदत्तविकल्पेभ्य: उत्तरं चिनुत) [1+1=2]

क) 'विधात्रा स्वायत्तमेकान्तगुणं मौनं विनिर्मितम्' इत्यत्र क्रियापदं किम्?

अ) विधात्रा ब) एकान्तगुणं

स) विनिर्मितम् द) मौनं

ख) 'पण्डितानाम्' इत्यस्य विलोमपदं किम्?

अ) अपण्डितानाम् ब) सर्वविदाम्

स) विभूषणानाम् द) मौनानाम्

17) अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत । [5]

स्वप्निल: – आचार्य! योगाङ्गानां नामानि तु अस्माभि: सुष्ठु ज्ञातानि अवबुद्धानि चाऽपि। साम्प्रतं योगाङ्गानां फलमपि ज्ञातुं महती उत्कण्ठा वर्तते ।

योगाचार्य: – आम् आम् तदपि बोधयामि । श्रृण्वन्तु, लिखन्तु अवबुध्यन्तु च तावत् ।

यम: –

अहिंसा – अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्याग:।

सत्यम् – सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्।

अस्तेयम् – अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्।

ब्रह्मचर्यम् – ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभ:।

अपरिग्रह: – अपरिग्रहस्थैर्ये जन्मकथन्ता सम्बोध:।

i) यथानिर्देशम् उत्तरं लिखत – [1+1+1=3]

क) स्वप्निलस्य केषां फलं ज्ञातुं महती उत्कण्ठा वर्तते? (एकपदेन उत्तरत)

ख) यमा: कति? (एकपदेन उत्तरत)

ग) वीर्यलाभ: कुत्र भवति? (पूर्णवाक्येन उत्तरत)

ii) भाषिककार्यम् (प्रदत्तविकल्पेभ्य: उत्तरं चिनुत) [1+1=2]

क) 'योगाङ्गानां फलमपि ज्ञातुं महती उत्कण्ठा वर्तते' इत्यत्र विशेषणपदं किम्?

अ) योगाङ्गानाम् ब) फलमपि

स) उत्कण्ठा द) महती

ख) 'योगाङ्गानां नामानि अस्माभि: ज्ञातानि' इत्यत्र क्रियापदं किम्?

अ) योगाङ्गानाम् ब) अस्माभि:

स) ज्ञातानि द) नामानि

अथवा

लव: – (प्रविश्य, स्वगतम्) अविज्ञातवय: क्रमौचित्यात् पूज्यानपि सत: कथमभिवादयिष्ये? (विचिन्त्य) अयं पुनरविरूद्ध प्रकार इति वृद्धेभ्य: श्रूयते। (सविनयमुपसृत्य) एष वो लवस्य शिरसा प्रणामपर्याय:।

अरून्धतीजनकौ – कल्याणिन्! आयुष्मान् भूया: ।

कौसल्या – जात! चिरं जीव।

अरून्धती – एहि वत्स! (लवमुत्सङ्गे गृहीत्वा आत्मगतम्)
दिष्ट्या न केवलमुत्सङ्गश्चिरान्मनोरथोऽपि मे पूरित:।

कौसल्या – जात! इतोऽपि तावदेहि। (उत्सङ्गे गृहीत्वा) अहो, न केवलं मांसलोज्जवलेन देहबन्धेन, कलहंसघोषघर्घरानुनादिना स्वरेण च रामभद्रमनुसरति। जात! पश्यामि ते मुख पुण्डरीकम्। (चिबुकमुन्नमय्य, निरूप्य, सवाष्पाकूतम्) राजर्षे! किं न पश्यसि? निपुणं निरूप्यमाणो वत्साया मे वध्वा मुखचन्द्रेणापि संवदत्येव।

i) यथानिर्देशम् उत्तरं लिखत – [1+1+1=3]

क) 'अयं पुनरविरूद्ध प्रकार' इति केभ्य: श्रूयते? (एकपदेन उत्तरत)

ख) लव: कीदृशेन देहबन्धेन रामभद्रमनुसरति? (एकपदेन उत्तरत)

ग) 'जात! चिरं जीव' इति का वदति? (पूर्णवाक्येन उत्तरत)

ii) भाषिककार्यम् (प्रदत्तविकल्पेभ्य: उत्तरं चिनुत) [1+1=2]

क) 'इतोऽपि तावदेहि' इत्यत्र क्रियापदं किम्?

अ) अपि ब) इत:

स) एहि द) तावद्

ख) 'मांसलोज्जवलेन देहबन्धेन' इत्यत्र विशेष्यपदं किम्?

अ) देहबन्धेन ब) उज्जवलेन

स) बन्धेन द) मांसलोज्जवलेन

## <u>खण्डः – 'द'</u>

18) रेखांकित पदेषु प्रश्ननिर्माणं कुरूत। (केषाञ्चित् चतुर्णाम्) [4×1=4]

क) 'उत्तररामचरितम्' इति नाटकस्य रचयिता <u>भवभूतिः</u>।

ख) लवः <u>रामभद्रम्</u> अनुसरति।

ग) स <u>चपलः</u> दृश्यते।

घ) <u>अकर्मणः</u> कर्म ज्यायः।

ङ) श्रीनायारस्य <u>राज्येन</u> सह कश्चित् सम्पर्कः नास्ति।

च) <u>शब्दानां</u> प्रतिपत्तौ प्रतिपदपाठः कर्त्तव्यः।

19) अधोलिखित वाक्यानां संस्कृतभाषायाम् अनुवादः करणीयः। (केषाञ्चित् पञ्चानाम्) [5×1=5]

क) विद्या से अमरता प्राप्त होती है।

ख) हिमांगी शिव की अर्चना करती है।

ग) शिशु दूध पीवे।

घ) कुमुद पानी से मुँह धोता है।

ङ) गीता को रामायण पढना अच्छा लगता है।

च) धन से ज्ञान अच्छा है।

छ) कवियों में कालिदास श्रेष्ठ है।

ज) तिलों में तेल है।

20) निम्नलिखितेषु कमपि विषयं स्वीकृत्य 50-60 शब्देषु संस्कृत भाषायां निबन्धं लिखत। [5]

क) सतां सङ्गतिः (सत्सङ्गतिः)

ख) भारत देशः

ग) संस्कृतं संस्कृताश्रिता

OOOO



Previous Pathshala

DO NOT WRITE ANYTHING HERE